रमते रमया सार्द्धं तेन रामं विदुर्ब्बुधाः ।
रमाया रमणस्थानं रामं रामविदो विदुः ॥
रा चेति लक्ष्मीवचनो मश्चापीश्वरवाचकः ।
लक्ष्मीपतिं गतिं रामं प्रवदन्ति मनीषिणः ॥
नाम्नां सहस्रं दिव्यानां स्मरणे यत् फलं लभेत् ।
तत् फलं लभते नूनं रामोच्चारणमात्रतः ॥”
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११० अध्यायः ॥
(तथा च अध्यात्मरामायणे । १ । ३ । ४४ ।
“यस्मिन् रमन्ते मुनयो विद्यया ज्ञानविप्लवे ।
तं गुरुः प्राह रामेति रमणाद्राम इत्यपि ॥”

एतत्कृतराक्षसवधवृत्तान्तं विचार्य्य यदुक्तं रामानुजेन तदाह । “अत्र युद्धदिवसगणनायां कतकतीर्थौ । पूर्व्वं सुवेलारोहणदिने ।
‘ततोऽस्तमगमत् सूर्य्यः सन्ध्यया प्रतिरञ्जितः ।
पूर्णचन्द्रप्रदीप्ता च क्षपा समतिवर्त्तते ॥’
इत्युक्तेस्तद्दिनं चतुर्द्दशीपूर्णिमान्यतरदिति स्पष्टम् । ततः कृष्णप्रतिपदि युद्धारम्भस्तस्यामेव रात्रौ नागपाशबन्धतद्विमोचौ । द्वितीयायां धूम्राक्षवधः । तृतीयायां वज्रदंष्ट्रस्य । चतुर्थ्यामकम्पनस्य । पञ्चम्यां प्रहस्तस्य । षष्ठ्यां रावणभङ्गः । सप्तम्यां कुम्भकर्णवधः । अष्टम्यामतिकायादेः । नवम्यामिन्द्रजितो ब्रह्मास्त्रप्रयोगः । दशम्यां दिवा निकुम्भवधः । तद्रात्रौ मकराक्षवधः । एकादश्यादित्रयोदश्यन्तदिनत्रयेण इन्द्रजिद्वधः । चतुर्द्दश्यां मूलबलवधः । अमायां रावणयुद्धारम्भस्तद्वधाविति पञ्चदशदिनानि सर्व्वं युद्धमिति । अत्रेदं वक्तव्यम् । केयं कृष्णप्रतिपत् माघकृष्णस्य वा चैत्रकृष्णस्य वा । नाद्यः चैत्रे पुष्यनक्षत्रेऽयोध्यातो वनं प्रति रामस्य प्रस्थानमिति स्पष्टमयोध्याकाण्डे । चैत्रे पुष्यश्च शुक्लपक्ष एव तत्रापि नवम्यादिदिनत्रये एवेति स्पष्टमेव ज्योतिषादौ । तत्र नवमीरिक्तात्वादभिषेकायोग्या दशम्येव तु पूर्णत्वाद्योग्या । एवञ्च चैत्रशुक्लदशम्यां प्रस्थानम् । तत्र माघकृष्णामायां युद्धसमाप्तौ तदुत्तरपञ्चम्यां भरद्वाजाश्रमगमनम् ।
‘पूर्णे चतुर्द्दशे वर्षे पञ्चम्यां लक्ष्मणाग्रजः ।
भरद्वाजाश्रमं प्राप्य ववन्दे नियतो मुनिम् ॥’
इति वक्ष्यमाणत्वात् । तत्र न च चतुर्द्दशवर्षसमाप्तिरिति भगवतः प्रतिज्ञाहानिः । पूर्णे चतुर्द्दशे वर्षे इत्युक्तेरसङ्गतिश्च । युद्धोत्तरं तावत्कालं लङ्कायामवस्थानस्यालाभाच्च । चैत्रशुक्लपञ्चम्यां तत्रागमनेऽपि पञ्चदिनन्यूनतैवेति तद्दोषस्तदवस्थैव । तदुत्तरद्वितीयदिने एवायोध्याप्रवेशस्य लाभात् । अमान्तमानेन चैत्रकृष्णोत्तरपञ्चम्यां तदाश्रमगतावपि चतुर्द्दशवर्षतो बहुदिनाधिक्येन चतुर्द्दशवर्षसमाप्तिदिनेऽयोध्यागमने “मया प्राणा देया” इति भरतप्रतिज्ञाहानिः । सा च प्रतिज्ञा चित्रकूटे रामसन्निधाविव्ययोध्याकाण्डान्ते स्पष्टम् । एतेन चैत्रकृष्णप्रतिपदि युद्धारम्भस्तच्छुक्लप्रतिपदि रावणसंहार इति तीर्थोक्तश्चैत्रकृष्णस्येत्यन्योऽपि परास्तः । पूर्णिमान्तमानेन तिथिबद्धद्वादशमासैर्व्वर्षगणने पञ्चदिनानां न्यूनत्वात् । अमान्तमानेन चैत्रकृष्णग्रहणे बहुदिनाधिक्यम् । सावनमानेन षष्ट्युत्तरत्रिशता दिनैर्व्वर्षगणने तु तिथिबद्धवर्षात् तत्र षड्दिनाधिक्येन चतुर्द्दशवर्षाणाञ्चतुरशीत्यहोरात्रवृद्ध्या बहुदिनन्यूनतैव । किञ्च महाभारते युधिष्ठिरवनवासे त्रयोदशवर्षमिते किञ्चित्कालादर्व्वागेव तेषां प्राकट्ये दुर्य्योधनेन तदसमाप्तौ एषां प्राकट्येन पुनस्तावत्पर्य्यन्तं पुनरेतैर्व्वनवासः कर्त्तव्यो भविष्यतीति भीष्मं प्रत्युक्ते भीष्मवाक्यं विराटपर्व्वणि ।
‘पञ्चमे पञ्चमे वर्षे द्वौ मासावुपजायतः ।
एषामभ्यधिका मासाः पञ्च च द्वादशक्षपाः ॥
त्रयोदशानां वर्षाणामिति मे धीयते मतिः ।
सर्व्वं यथावच्चरितं यद्यदेभिः प्रतिश्रुतम् ॥
एवमेतद्ध्रुवं ज्ञात्वा ततो बीभत्सुरागतः ।
सर्व्वे चैव महात्मानः सर्व्वे धर्म्मार्थकोविदाः ॥
येषां युधिष्ठिरो राजा कस्माद्धर्म्मेऽपराध्नुयुः ॥’
इति । एवञ्चेदृशव्यवहारनिबद्धद्वादशमासैरेव वर्षगणना । अधिकमासगणना चोचितैव । एवञ्चाधिकमासगणनायां धर्म्महानौ न्याय्यत्वे च स्थिते कस्माद्रामस्तामुपेक्षेत । भरतो वा तान्न गणयेत् । एवञ्चामान्तमानेन चतुर्द्दशीयाश्विनकृष्णे । पूर्णिमान्तमानेन कार्त्तिककृष्णे षष्ठ्यां तत्समाप्तिरित्यायाति । अन्यथा चैत्रशुक्लदशम्यामारब्धस्य वनवासस्य षष्ठ्यां चतुर्द्दशवर्षसमाप्तिर्न कथमप्युपपद्यते । तद्गणने तु एकादशदिनन्यूनषस्रा मासानां चतुर्द्दशवर्षेषु वृद्धायुपपद्यत एव सा । तस्मात् द्वादशसमाप्त्युत्तरं त्रयोदशे किञ्चिद्गतेति अरण्यकाण्डोक्तास्मद्रीत्या फाल्गुनाष्टम्यां रावणकृतसीतापहारः । ततश्चतुर्द्दशे किञ्चिद्गतेति रामस्य लङ्कासमीपगमनम् । वर्त्तते दशमो मासो द्वौ तु शेषौ प्लवङ्गमेति सीतोक्तिः सावनमानेन स्वहरणदिनतः कालगणनया । तत्र पूर्णचन्द्रप्रदीप्ता चेति रामोक्त्या पौषशुक्लचतुर्द्दश्यां पूर्णिमायां वा त्रिकूटशिखरप्राप्तौ रामस्य । किञ्च हनूमतो लङ्काप्रवेशोत्तरं सीतादर्शनकाले हिमव्यपायेन च शीतरश्मिरभ्युत्थितो नैकसहस्ररश्मिरिति वाक्येन द्वौ मासौ रक्षितव्यौ मे योऽवधिस्ते मया कृत इति रावणवाक्येन मार्गशुक्लदशम्युत्तरं हनूमतो लङ्काप्रवेशो दिनद्वयान्तरे लभ्यते इति निरूपितं सुन्दरकाण्डे । ततो मार्गकृष्णाष्टम्यां राघवप्रस्थानस्याभ्युक्तत्वेन पौषपूर्णिमात्वमेवोचितं तत्प्राप्तिदिनस्य । ततो दशपञ्चदिनानि सेनानिवेशदूतप्रेषणादिना गतानि । ततो युद्धारम्भस्तच्च तदारभ्य भाद्रश्रावणोभयमासान्तं लङ्कापुराद् बहिः सेनयोः सङ्कुलं युद्धम् । ततो बहुराक्षसक्षयेण भीता राक्षसा लङ्कां प्रविष्टा इति तद्दिनेऽवहारः । तदुत्तरप्रतिपदि रात्राविन्द्रजित्कृतशरबन्ध इत्यादि । अतएव शरबन्धबद्धराघवदर्शनकाले सीतावाक्यम् । तीर्त्वा सागरमक्षोभ्यं भ्रातरौ गोष्पदे हताविति । अनेन बहुदिनयुद्धे बहुषु राक्षसेषु क्षयितेषु यूथपकतिपयरूपेऽत्यल्पावशिष्टे सैन्ये तयोः शरबन्ध इति लभ्यते । तथा अयं ते सुमहान् कालः शयानस्य महाबलेति कुम्भकर्णम्प्रति रावणोक्त्या साम्प्रतन्निद्रायाः षण्मासाधिकत्वप्रतीतेरप्येवमेवोचितम् । निरूपितञ्चैतत् प्राक् । सेतुबन्धादिवृत्तान्तं त्वं न जानीषे इति कुम्भकर्णम्प्रति रावणोक्त्या पूर्व्वमन्त्रकरणोत्तरं मध्ये जागरणाभावस्य प्रतीतेः । किञ्च । शरबन्धनदिनं न कृष्णप्रतिपत् । तस्याः पूर्णिमोत्तरत्वेन सम्पूर्णरात्रौ चन्द्रसत्तया तस्मिंस्तमसि दारुणे इत्याद्युक्तेरसङ्गत्यापत्तेरतः सा शुक्लप्रतिपदाद्या । एवञ्चामान्तपञ्चमासं युद्धमित्यस्यात्यन्तमसङ्गत्यापत्तिः । यत्तु अमायामेव रावणवध इति तत्तु न युक्तम् । इन्द्रजिद्वधोत्तरम् ।
‘अभ्युत्थानं त्वमद्यैव कृष्णपक्षचतुर्द्दशीम् ।
कृत्वा निर्य्याह्यमावास्यां विजयाय बलैर्वृतः ॥’
इति रावणम्प्रति सुपार्श्वस्योक्त्या । चतुर्द्दश्यां रावणप्रेषितबलवधोत्तरममायां निर्गतरावणेन रामलक्ष्मणयोर्युद्धे रात्रौ लक्ष्मणस्य शक्तिघातोत्तरं रावणलङ्काप्रवेशस्योक्ततया ततो लक्ष्मणचिकित्सोत्तरं पुना रामरावणयुद्धस्य वाल्मीकिनैव स्पष्टमुक्ततया तदसम्भवात् । किञ्च । आदित्यहृदयस्यादित्यं प्रेक्ष्य जप्त्वेदं परं हर्षमवाप्तवानित्यनेन सूर्य्यदर्शनोत्तरं जपस्योक्ततया रावणमरणोत्तरं स्थिरप्रभश्चाप्यभवद्दिवाकर इत्युक्त्या दिवा तद्वधप्रतीत्या च चिरकालयुद्धोत्तरं लक्ष्मणे शक्तिघातस्य तदर्थमोषधीपर्व्वतानयनस्य चोक्तत्वेनामारात्रौ शक्तिघातप्रतीत्या रणाद्रावणापगमस्य प्रतीत्या च तद्विरोधात् । तथा पाद्मे ।
‘ततो जज्ञे महायुद्धं सङ्कुलं कपिरक्षसाम् ।
मध्याह्ने प्रथमं युद्धं प्रारब्धं प्रतिपद्यभूत् ॥’
प्रतिपदि शुक्लप्रतिपदीत्यर्थः । उक्तयुक्तेः ।
‘ततो निशि समागम्य मायावी शक्रजिद् बली ।
बबन्ध नागपाशैस्तौ राघवौ च हरिव्रजान् ॥’
ततः चिरकालसङ्कुलयुद्धोत्तरम् । अन्यथा तस्यां निशीत्येव वदेत् । अपि द्वितीयेऽह्नि षष्ठामिति चोक्त्वा दारुणे तमसीति रामायणोक्त्या च भाद्रश्रावणोभयमासोत्तरप्रतिपद्येतदिति बोध्यम् ।
‘वैनतेयस्तदाभ्येत्य तानि चास्त्राण्यमोचयत् ।
द्वितीयेऽहनि धूम्राक्षं हनूमान्निजघान वै ॥
तृतीयेऽह्नि वज्रदंष्ट्रं खड्गाच्चिच्छेद चाङ्गदः ।
जघान हनूमान् भूयश्चतुर्थेऽह्न्यकम्पनम् ॥
प्रहस्तं पञ्चमीतिथ्यां नीलश्चिच्छेद मर्द्दने ।
रावणः परिभूतोऽभूत् षष्ठ्यां रामेण धन्विना ॥
अथ लङ्केश्वरः खिन्नः कुम्भकर्णं महोदरम् ।
शैलशृङ्गरवातान्नधावनाद्यैरबोधयत् ।
जघान तं कुम्भकर्णं रामः सप्तमवासरे ॥’